## रम्यसंस्कृतम्। सङ्ख्याविशेषणानि - १। तृतीयः घटकः।



**संवादम् इमं पठत।**

[ग्रीष्मावकाशे दौहित्राः दौहित्र्यः च मातामह्या सह केवलं संस्कृतेन वार्तालापं कुर्वन्ति। मातामही तेभ्यः संस्कृतभाषायाः विशेषान् कथयति।]

मातामही - अस्माकं बाल्यकाले दूरदर्शने एकात्मतायाः एकं गीतम् आसीत्। तद् गायामः -

**एका चटका, अनेकाश्चटकाः।**
**धान्यम् अत्तुम् आयाताश्चटकाः॥**

सुधेन्दुः - मातामही गतसमये त्वया चतुरस्य काकस्य कथागीतं श्रावितम्।

**एकः काकः तृषापीडितः।**
**जलं न लभते दूरे दूरे॥**

तत्र एकः काकः इति उक्तम्। अधुना अत्र एका चटका इति वदसि।

पृथा - आम्। तथा च 'एकं गीतम्' इत्यपि उक्तम्। तर्हि किमर्थम् अत्र एकः, एकम् इति भेदः ?

वेणुः - (चिन्तयित्वा) हं.. मया ज्ञातम्। यथा एकः बालः, एका बाला, एकं वनम्।

मातामही - बहु सम्यक् वेणो।

सुधेन्दुः - तर्हि एकः चषकः, एका लेखनी, एकं फेनकम्। अपि योग्यमेतत् ?

मातामही - बाढम्। सम्यक् अवगतं त्वया। इतोऽपि एकम् आङ्ग्ल-बालगीतं यूयं गायथ स्म। अपि स्मरथ?

**द्वौ लघू हस्तौ तालिकावादनाय। द्वौ लघू पादौ गमनागमनाय।**
**द्वे लघू नेत्रे नभोदर्शनाय।...**

पृथा - मातामहि, अवगतं मया। तथा च द्वौ-द्वे एतयोः भेदोऽपि ज्ञातः। यथा द्वौ पुरुषौ, द्वौ दीपौ।

वेणुः - द्वे फले, द्वे उद्याने।

सुधेन्दुः - महिलाद्वयं वा द्रोणीद्वयम् इति कथं वक्तव्यम् ?

मातामही - द्वे महिले द्वे द्रोण्यौ वा। इदानीमहं सङ्ख्याशृङ्खलां वदामि। कथयत किमेतत् ?
त्रयः तिस्रः त्रीणि। चत्वारः चतस्रः चत्वारि॥

सुधेन्दुः - (हसित्वा) मया अवगतम्। **त्रयः** वृक्षाः, **तिस्रः** मक्षिकाः, **त्रीणि** फलानि।...

पृथा - तिष्ठ रे। अग्रे अहं वदामि। **चत्वारः** मुनयः, **चतस्रः** धेनवः, **चत्वारि** वाहनानि।

मातामही - सुशोभनम्। चाणाक्षाः यूयम्।

वेणुः - इतः परं वयं एकतः चतुःपर्यन्तं सङ्ख्यारूपाणि पठामः।

मातामही - साधु। साधु।

## एकतः चतुःपर्यन्तं सङ्ख्यारूपाणि

| एक (नित्यम् एकवचनम्) | | | | द्वि (नित्यं द्विवचनम्) | | |
|---|---|---|---|---|---|---|
| पुं. | स्त्री. | नपुं. | विभक्तिः | पुं. | स्त्री. | नपुं. |
| एकः | एका | एकम् | प्रथमा | द्वौ | द्वे | द्वे |
| एकम् | एकाम् | एकम् | द्वितीया | द्वौ | द्वे | द्वे |
| एकेन | एकया | एकेन | तृतीया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्मै | एकस्यै | एकस्मै | चतुर्थी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्मात् | एकस्याः | एकस्मात् | पञ्चमी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| एकस्य | एकस्याः | एकस्य | षष्ठी | द्वयोः | द्वयोः | द्वयोः |
| एकस्मिन् | एकस्याम् | एकस्मिन् | सप्तमी | द्वयोः | द्वयोः | द्वयोः |

| त्रि (नित्यं बहुवचनम्) | | | | चतुर् (नित्यं बहुवचनम्) | | |
|---|---|---|---|---|---|---|
| पुं. | स्त्री. | नपुं. | विभक्तिः | पुं. | स्त्री. | नपुं. |
| त्रयः | तिस्रः | त्रीणि | प्रथमा | चत्वारः | चतस्रः | चत्वारि |
| त्रीन् | तिस्रः | त्रीणि | द्वितीया | चतुरः | चतस्रः | चत्वारि |
| त्रिभिः | तिसृभिः | त्रिभिः | तृतीया | चतुर्भिः | चतसृभिः | चतुर्भिः |
| त्रिभ्यः | तिसृभ्यः | त्रिभ्यः | चतुर्थी | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| त्रिभ्यः | तिसृभ्यः | त्रिभ्यः | पञ्चमी | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| त्रयाणाम् | तिसृणाम् | त्रयाणाम् | षष्ठी | चतुर्णाम् | चतसृणाम् | चतुर्णाम् |
| त्रिषु | तिसृषु | त्रिषु | सप्तमी | चतुर्षु | चतसृषु | चतुर्षु |

### सङ्ख्यारूपाणि लिखित्वा वाक्यानि पूरयत।

अ) _______ (४) महिलाभ्यः तण्डुलान् आनय।

आ) तेषु _______ (३) तरुषु खगाः नीडानि अरचयन्।

इ) _______ (१) कपेः टोपिका पतिता।

ई) एतासु _______ (२) कृती लिखन्तु।

उ) _______ (३) भुवनानां समूहः नाम त्रिभुवनम्।

ऊ) _______ (१) दासी सन्देशं कथितवती।

ए) तयोः _______ (२) परस्परमेलनं न आसीत्।

ऐ) _______ (१) नगरे सः वसति स्म।

ओ) _______ (२) अपि कवी काव्यम् अपठताम्।

औ) कथामेताम् _______ (४) छात्रेभ्यः कथय।

अं) अहं _______ (३) चौरान् अपश्यम्।

क) वयं _______ (४) गीतानि गायामः।

ख) सः _______ (४) वेदान् अधीतवान्।

ग) वयं _______ (२) नेत्राभ्यां पश्यामः।

घ) शिवः _______ (३) नेत्रैः पश्यति।

### हसत नन्दत !

१) नीता – आचार्ये सा गौरी किमपि न करोति। आदिनं उपविश्य केवलं व्यर्थं समययापनं करोति।
शिक्षिका – अस्तु। किन्तु त्वं कथम् एतत् जानासि ?
नीता – अहं तु सर्वदा, तामेव पश्यामि खलु !



२) शिक्षिका – छात्राः, ह्यः भूतकालः पाठितः किल? अधुना मिहिके, भूतकालस्य एकम् उदाहरणं कथय।
मिहिका – आचार्ये, अहं तु ह्यः अनुपस्थिता आसम्।
शिक्षिका – उत्तमं मिहिके ! त्वया सम्यक् भूतकालः ज्ञातः !